**शिवज्ञान** न॰ मासभेदे दण्डभेदेन माहेन्द्रादियोगज्ञापके शास्त्रभेदे "माहेन्द्रे विजयो नित्यममृते कार्य्यशोभनम्। वक्रे कार्य्यविलम्बः स्यात् शून्ये च मरणं भवेत्। वैशाखादिश्रावणान्तमेकभावेन संवदेत्। अमृतादि दिवारात्रौ चतुर्मासं यथाक्रमम्। यामभानं दिशमाने ज्ञेयं सर्वत्र मासके। तत्प्रमाणेन ज्ञातव्यं दण्डमान विचक्षणैः। रात्रिमानप्रमाणेन ज्ञेयं दण्डप्रमाणकम्। न वारतिथिनक्षत्रं न योगः करणं तथा। शिवज्ञानं समासाद्य सर्वं सुनिविचारणम्। भाद्रादिमार्गपर्य्यन्तं समवारे समादिशेत्। शून्यवक्रादियोगं हि पौषादि-चैत्रतस्तथा" ज्योति॰।

**शिवचतुर्दशी** स्त्री शिवप्रिया चतुर्दशी। फाल्गुनकृष्णचतुर्दश्याम्। व्रतशब्दे शिवचतुर्दशीव्रतं दृश्यम्।

**शिवताति** स्त्री शिव+तातिल्। मङ्गलपरम्परायां हेमच॰

**शिवदारु** न॰ शिवो देवस्तद्वादिकं दारु। देवदारुवृक्षे राजनि॰

**शिवदूती** स्त्री शिवो दूतो यस्याः। १दुर्गामूर्त्तिभेदे त्रिका॰ २योगिनीभेदे च "यदा जघान जगतां रक्तवीजं हिताय वै। महादेवी महामाया तदास्याः कायतः सृता। दूतं प्रस्थापयामास शिवं शुम्भाय साम्बिका। तेन सा शिवदूतीति देवैः सर्वैः प्रगीयते" कालिकापु॰ ६०अ॰। "यः शिवाविरुतं श्रुत्वा शिवदूतीं शिवप्रदाम्। प्रणमेत् साधको भक्त्या तस्य कामाः करे स्थिताः" तत्रैव। "ब्रह्माणी प्रथमा प्रोक्ता ततो माहेश्वरी परा। कौमारी वैष्णवी चैव वाराही पञ्चमी तथा। नारसिंही तथैवैन्द्री शिवदूती तथाष्टमी। एताः पूज्या महाभागाः योगिन्यः कामदायिकाः" तत्रैव। "कौशिक्याः हृदयाद्देवी निःसृता ध्यानतो हरेः। शिवदूतीति विख्याता शिवाशतसुसंवृता" तत्रैव।

**शिवद्रुम** पु॰ शिवप्रियः द्रुमः। बिल्ववृक्षे राजनि॰।

**शिवद्विष्टा** स्त्री ६त॰। केतक्यां राजनि॰।

**शिवधर्म्म** न॰ शिवस्य तदुपासनार्थो धर्मो यत्र। उपपुराणभेदे "चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम्" कूर्मपु॰।

**शिवधातु** पु॰ ६त॰। पारदे पारदशब्दे दृश्यम्।

**शिवनाभि** पु॰ शिवस्य नाभिरिव। शिवलिङ्गभेदे "शिवनाभिमयं लिङ्गं प्रतिपूज्यं महर्षिभिः। श्रेष्ठत्वं सर्वलिङ्गेभ्यस्तस्मात् पूज्यं विधानतः" वीरमि॰। कच समा॰। शिवनाभः शालग्रामशिलाभेदे शालग्रामशब्दे दृश्यम्।

**शिवपुरी** स्त्री ६त॰। काश्यां हेमच॰ शिवनगर्य्यादयोऽप्यत्र।

**शिवप्रिय** न॰ ६त॰। १रुद्राक्षे २महादेववल्लभे त्रि॰ राजनि॰। ३वकवृक्षे जटा॰। ४धुस्तूरे ५स्फटिके च पु॰ राजनि॰। ६दुर्गायां स्त्री शब्दमा॰। [अर्जुनवृक्षे राजनि॰।

**शिवमल्लक** पु॰ शिवः कल्याणकरः मल्ल इव कायति कै-क।

**शिवमल्ली** स्त्री शिवस्य मल्लीव प्रियत्वात्। वकवृक्षे अमरः।

**शिवरात्रि** स्त्री शिवप्रिया तदुपासनार्था रात्रिः। माघातः परस्यां कृष्णचतुर्दश्याम्। तद्रात्रौ हि शिवपूजनव्रतादिकं क्रियते इति तस्या रात्रेस्तत्प्रियत्वम्। २तद्दिनकर्त्तव्ये व्रते च। तद्विधानकालादि ति॰त॰ उक्तं यथा कालमाधवीये स्कान्दे नागरखण्डम् "माघमासस्य शेषे या प्रथमे फाल्गुनस्य च। कृष्णा चतुर्दशी सा तु शिवरात्रिः प्रकीर्त्तिता"। अतैकस्यास्तिथेर्माघीयत्वफाल्गुनीयत्वे मुख्यगौणाभ्यामविरुद्धे। ततस्तु माघ्यनन्तरा चतुर्दशी शिवरात्रिः। अस्यामुपवासः प्रधानम् "न स्नानेन न वस्त्रेण न धूपेन न चार्च्चया। तुष्यामि न तथा पुष्पैर्यथा तत्रोपवासतः" इति शङ्करोक्तेः। स्कान्दे "तत्र रात्रौ प्रकर्त्तव्यं शिवप्रीणनतत्परैः। प्रहरे प्रहरे स्नानं पूजा चैव विशेषतः"। अत्र वीप्सया प्रहरचतुष्टयसाध्यं प्रतीयते। नरसिंहाचार्य्यधृतेश्वरसंहितायाम् "शैवो वा वैष्णवो वापि यो वा स्यादन्यपूजकः। सर्वं पूजाफलं हन्ति शिवरात्रिबहिर्मुखः"। संवत्सरप्रदीपे "दुग्धेन प्रथमे स्नानं दध्ना चैव द्वितीयके। तृतीये च तथाज्येन चतुर्थे मधुना तथा"। ईशानसंहितायाम् "माघे कृष्णचतुर्दश्यां रविवारो यदा भवेत्। भौमो वापि भवेद्देवि! कर्त्तव्यं व्रतमुत्तमम्। शिवयोगस्य योगेन तद्भवेदुत्तमोत्तमम्। शिवरात्रिव्रतं नाम सर्वपापप्रणाशनम्। आचाण्डालात् मनुष्याणां भुक्तिमुक्तिप्रदायकम्"। नागरखण्डे "उपवासप्रभावेण बलादपि च जागरात्। शिवरात्रेस्तथा तस्य लिङ्गस्यापि प्रपूजया। अक्षयान् लभते लोकान् शिवसायुज्यमाप्नुयात्"। पाद्मे "वर्षे वर्षे महादेवि! नरो नारी पतिव्रता। शिवरात्रौ महादेव कामं भक्त्या प्रपूजयेत्"। ईशानसंहितायाम् "एवमेव व्रतं कुर्य्यात् प्रतिसंवत्सरं व्रती। द्वादशाब्दिकमेतद्धि चतुर्विंशाब्दिकं तथा। सर्वान् कामानवाप्नोति प्रेत्य चेह च मानवः"। हेमाद्रिधृता स्मृतिः "प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी"। प्रदोषमाह वत्सः "प्रदोषोऽस्तमयादूर्द्ध्वं घटि-